International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(3): 88-89
© 2019 IJSR
www.anantaajournal.com
Received: 11-03-2019
Accepted: 13-04-2019

**डॉ. नृसिंहनाथगुरुः**
सहायकाचार्यः, साहित्यविभागः,
कलियाचकविक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः,
हेरिया, पूर्वमेदिनीपुरम्, पश्चिमवङ्गः, भारत

Correspondence
**डॉ. नृसिंहनाथगुरुः**
सहायकाचार्यः, साहित्यविभागः,
कलियाचकविक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः,
हेरिया, पूर्वमेदिनीपुरम्, पश्चिमवङ्गः, भारत

# आदर्शसमाजनिर्माणे विवेकानन्दसाहित्यस्यावदानम्

**डॉ. नृसिंहनाथगुरुः**

**प्रस्तावना**

सम्प्रति समाजः कलुषितः भवति । सर्वत्र भ्रष्टाचारस्य प्रादुर्भावो दृश्यते । अनुचितसाधनावलम्बनेन, अनैतिकाचरणेन, स्वकर्तव्यस्यापालनेन भारतस्य उन्नतिः घटते । उत्कोचप्रदानं, खाद्यद्रव्येषु अखाद्यमिश्रणं, कुमार्गे धनोपार्जनं, स्वकर्तव्यं प्रति विमुखं, सर्वकारप्रदत्तसाधनानामनुचितप्रयोगकरणं, हननं, लुण्ठनं, धर्षणादिनानाविधसमस्याः समाजे प्रवर्धन्ते । तदेवकारणमस्ति अनुदिनं भ्रष्टाचारः असाध्यरोगवत्प्रवर्तते । अयमेव भ्रष्टाचारः, दूराचारः, अधर्मः, केषुचिदेव जनेषु वर्त्तते न, अपि तु वटवृक्षवत् शतमूलः सन् सवित्रिको रोगः प्रतिदिनं वर्धत एव । परन्तु एतत् सत्यं यत् यदा यदा भ्रष्टाचारस्य, दुराचारस्य अधर्मस्य वा अभिवृद्धिः भवति तदा तदादर्शसमाजनिर्माणे दार्शनिकानाममृतसन्देशः वैप्लविकं परिवर्तनं साधयति । देवभूमिरूपत्वेन प्रसिद्धमस्माकं भारतवर्षम् । अत्र काले काले अनेके समाजसंस्कारकाः, दार्शनिकाः, महापुरुषाः आध्यात्मवादिनः, दिव्यात्मनश्चाविभूय प्रकाशयन्ति ज्ञानालोकेन सम्पूर्णं जगदिदमादर्शनिर्वचनेन प्लावयन्ति च । कदाचित् स्वयं भगवानपि दुष्टाचारविनाशाय शिष्टाचार-रक्षणाय च विविधं स्वरूपमङ्गीकुर्वन् स्वावतारेण जगदुद्धरति । एतेष्वेव दिव्यप्रकाशेषु अन्यतमः स्वामिविवेकानन्दः, नरेन्द्रो वा । अयं १८६३ तमे वर्षे जनवरीमासस्य द्वादशतमे दिनाङ्के सोमवासरे वङ्गप्रदेशे सिमुलिआ नामके ग्रामे भुवनेश्वरी देवी-विश्वनाथदत्तयोः पुत्ररूपेण अवतीर्य सम्पूर्णं विश्वं नूतनाध्यात्मिकदार्शनिकदर्शनेन दिग्दर्शितवान् ।

रामकृष्णस्यानुगामिशिष्येषु अत्यन्तप्रतिष्ठितः स्वामी विवेकानन्दः भविष्यद्दर्शनार्थमपेक्षितया शक्त्या सम्पन्नः आसीत् । स आदर्शसमाजनिर्माणाय युवकानां कृते एकं सन्देशं दत्तवान् तद्यथा-

''भारतवर्षस्य सामाजिकप्रगतिः तदा भविष्यति यदा युवकाः, युवतयः मिलित्वा समर्पितभावेन कार्यं करिष्यन्ति । ये स्वकीयं सर्वमपि देशस्य समाजस्य कृते समर्पयितुं सिद्धाः, स्वच्छान्तकरणशीलाः भविष्यन्ति । यदा एतादृशाः युवकाः अग्रे आगच्छन्ति तदा भारतवर्षस्य सामाजिकार्थिकभौतिकाध्यात्मिकप्रगतिः न केवलं भविष्यति अपि तु आदर्शसमाजस्य निर्माणं भविष्यति ।''१ एवञ्च विवेकानन्देनोक्तम्- Give me a few men and women who are pure selfless, and I shall shake the world.2

ये युवकाः स्वच्छहृदयेनात्मना च समाजस्योत्थानमेकमात्रं स्वकर्तव्यमिति विचिन्त्य कार्यकरणे प्रवृत्ताः भवन्ति, ते वन्दनीयाः भवन्ति । विशालभारतवर्षस्योत्थानं पूर्णतया भारतस्य युवकानामुपरि एवाश्रितमस्ति ।३

**दोषनिवारणाय विवेकानन्दस्य सन्देशः–**

भारतीयाः वयमेतदवश्यमेव जानीमः यद् ; वयं यदि स्वयमेवास्माकं हानिं न प्रापयामः, तर्हि विश्वे तादृशी कापि शक्तिरेव नास्ति, या खलु अस्माकं हानिं सम्पादयेत् ।४ एवञ्च, इतरेषामुपरि दोषारोपणं न कुरु । यतः यानि कष्टानि त्वमनुभवन् असि, तेषां कृते त्वमेव एकमात्रं कारणम् ।५ यदा दोषपरिहारः भविष्यति तदा समाजस्य विकासः नूनं सम्भविष्यति ।

**संकीर्णतानिवारणाय स्वामिनः सन्देशः–**

कार्यक्षेत्रे विद्यमाना संकीर्णताऽस्माकं पतनस्य मुख्यकारणम् ।६ भारतवर्षस्य पतनस्य कृते दुःखदारिद्यमभाव-अघटनश्च प्रधानकारणद्वयम् । एतदेव यत् राष्ट्रमिदं जलकीट इव सर्वाणि संहृत्य कार्यक्षेत्रे सङ्कोच्य स्वकोशे अन्तर्हितमभूत् तथा सत्येच्छुकानामार्येतरमानव-जातीयानां स्वीयं जीवनप्रदं सत्यरत्नभाण्डारं नोदघाटितम् ।७ सङ्कीर्णतायाः परिहारः यदा भविष्यति तदा भारतस्य सामाजिकविकासः भविष्यति ।

**धर्मसम्बन्धे नरेन्द्रस्य सन्देशः**

यस्मिन् देशे उत्तमोत्तमशीर्षस्थानीयनेतारः सहस्रद्वयवर्षेभ्यः आरभ्य अद्य पर्यन्तं केवलम् इमान् एव विषयान् विचारयन्ति स्म यत् अन्नं किं दक्षिणेन हस्तेन खादनीयम् उत वामेन, जलं दक्षिणपार्श्वात् नेयम् उत वामपार्श्वात्, तेषां यदि अधोगतिः न भवेत्तर्हि कस्य वा अन्यस्य भवितुमर्हति ? धर्मे विकृतिनाशः यदा भविष्यति तदा अस्माकं प्रगतिः भविष्यति ।

**अत्याचारप्रसङ्गे विवेकानन्दस्य भूमिका**

साधारणजनानामुपेक्षिकरणमस्माकं पतनस्य अन्यदेकं कारणम् । यावत्पर्यन्तं विशालभारतवर्षस्य प्रत्येकोऽपि जनः सुशिक्षितः न स्यात्, सुपोषितः न स्यात्तथा सुपालितश्च न स्यात्तावत्समाजस्य प्रगतिः नैव सम्भविष्यति ।९

**महिलानां विषये विवेकानन्दस्य सन्देशः**

मनुना उक्तं यत्- ''यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः' परन्तु अद्यतनसमाजे महिलाः अवहेलिताः, अपेक्षिताः, भोग्याः, धर्षिताः च भवन्ति । महापापिनः नारीं घृणिताः, कीटाः, नरकस्य द्वाराणि इति कथयित्वा ताः अधः पातयन्ति ।१०

परन्तु चिन्तायाः विषयः स्त्रीणां पुरुषाणां मध्ये पार्थक्यं किमर्थम् ? अपि च भवन्तः सर्वदा महिलानां निन्दामेव कुर्वन्ति । परन्तु नैव कथयन्ति तासां प्रगतये किं कृतमिति ? अतः यावत् महिलानामुन्नतिः, प्रगतिश्च नैव भविष्यति तावद् भारतस्य सामाजिकविकासः, आदर्शसमाजस्य निर्माणं कदापि न भविष्यति ।११

**शिक्षाप्रसङ्गे विवेकानन्दस्य सन्देशः**

यस्याः संयमेन इच्छाशक्तिं वशीभूय तां फलदायिनीं कर्तुं शक्यते, तस्याः नाम शिक्षा ।१२ एवञ्च समस्तस्य शिक्षणस्य तथा प्रशिक्षणस्य एकमात्रमुद्देश्यं मनुष्यनिर्माणं भवेत् ।१३ अपि च यया शिक्षया वयं स्वस्य जीवननिर्मातुं शक्नुमः, चरित्रस्य निर्माणं कर्तुं शक्नुमः, विविधविचाराणां सामञ्जस्यं सम्पादयितुं शक्नुमः, सा एव शिक्षा ।१४ एवञ्च, अस्माकमेतादृश्याः शिक्षायाः आवश्यकता वर्तते यया चरित्रनिर्माणं भवेत्, मानसिकशक्तिः वर्धयेत्, बुद्धिः विकसिता स्यात्तथा देशस्य युवकाः स्वावलम्बिनः भवेयुः।१५

यदा सर्वेजनाः सुशिक्षिताः भविष्यन्ति तदा नूनमादर्शसमाजस्य निर्माणं भविष्यति । अपि च सः कथितवान्– 'इदमस्माकं कर्तव्यं यद् वयं स्वेतिवृतविषये सम्यग् जानीमः तथा स्व जीवने आचरणं कुर्मः' ।१५

**समाजस्य प्रगत्यर्थं विवेकानन्दस्य सन्देशः**

अहं भविष्यतविषये भयेन चिन्तया च स्पष्टं प्रकटयितुमिच्छामि ।१६ समासंस्कर्तॄन् उद्दिश्य अहं सूचयितुमिच्छामि यत् अहं तेषां मध्यतः यस्य कस्यापि अपेक्षया महत्तरः संस्कर्ता अस्मि । ते लघून् विषयान् एव संस्कर्तुमिच्छन्ति । अहं तु मूलमपि शाखाः संस्कर्तुमिच्छामि।१७ DeefHe ®e- The older I grow, the more everything seems to me to lie in manliness. This is my new gospel.18

तस्य सन्देशः न केवलं तदानीन्तनकालं प्रति आसीत् किन्तु समग्रयुगं प्रति, न केवलं भारतवर्षस्य कृते अपितु मानवसमाजस्य कृते आसीत् । भारतस्य सन्दर्भे तस्य सन्देशः लघूनि सामाजिकसंस्कारणानि धार्मिकसंस्काराणि उद्दिश्य नासीत्, किन्तु भारतस्य साङ्गोपाङ्गसमग्र राष्ट्रियजीवनस्य पुनः नवीकरणाय, सशक्तता सम्पादनाय चासीत् । अतः यदि विवेकानन्दस्य दर्शनेन वयं दिग्दर्शिताः भवामः तर्हि आदर्शसमाजनिर्माणमवश्यं भविष्यतीति दिक् ।

**पादटिप्पणी**

१. कोलकतास्थ- अद्वैताश्रमेण दशखण्डेषु प्रकाशितं स्वामी विवेकानन्दसाहित्यम्- ६ : २०७
२. Vevekananda his call to the nation - page 7
३. कोलकतास्थ- अद्वैताश्रमेण दशखण्डेषु प्रकाशितं स्वामी विवेकानन्दसाहित्यम्- ४ : २८०
४. कोलकतास्थ- अद्वैताश्रमेण दशखण्डेषु प्रकाशितं स्वामी विवेकानन्दसाहित्यम्- ५ : ६२-३
५. कोलकतास्थ- अद्वैताश्रमेण दशखण्डेषु प्रकाशितं स्वामी विवेकानन्दसाहित्यम्- ५ : ३२९
६. कोलकतास्थ- अद्वैताश्रमेण दशखण्डेषु प्रकाशितं स्वामी विवेकानन्दसाहित्यम्- ५ : १६९
७. कोलकतास्थ- अद्वैताश्रमेण दशखण्डेषु प्रकाशितं स्वामी विवेकानन्दसाहित्यम्- ५ : २१०
८. कोलकतास्थ- अद्वैताश्रमेण दशखण्डेषु प्रकाशितं स्वामी विवेकानन्दसाहित्यम्- २ : ३३७
९. कोलकतास्थ- अद्वैताश्रमेण दशखण्डेषु प्रकाशितं स्वामी विवेकानन्दसाहित्यम्- ४ : २६०
१०. कोलकतास्थ- अद्वैताश्रमेण दशखण्डेषु प्रकाशितं स्वामी विवेकानन्दसाहित्यम्- २ : ३३७
११. कोलकतास्थ- अद्वैताश्रमेण दशखण्डेषु प्रकाशितं स्वामी विवेकानन्दसाहित्यम्- ६ : १८१
१२. कोलकतास्थ- अद्वैताश्रमेण दशखण्डेषु प्रकाशितं स्वामी विवेकानन्दसाहित्यम्- ७ : ३५९
१३. कोलकतास्थ- अद्वैताश्रमेण दशखण्डेषु प्रकाशितं स्वामी विवेकानन्दसाहित्यम्- ४ : १७२
१४. कोलकतास्थ- अद्वैताश्रमेण दशखण्डेषु प्रकाशितं स्वामी विवेकानन्दसाहित्यम्- ५ : १९५
१५. कोलकतास्थ- अद्वैताश्रमेण दशखण्डेषु प्रकाशितं स्वामी विवेकानन्दसाहित्यम्- ८ : २७७
१६. भारतं तस्य समस्याश्च - मुखबन्धः
१७. भारतं तस्य समस्याश्च - मुखबन्धः
18. Vevekananda his call to the Nation

**संदर्भ**

१. संस्कृतसाहित्येतिहासः - आचार्य लोकमणि दाहालः, चौखम्बा कृष्णदास अकादमी, वाराणसी
२. स्वामी विवेकानन्दः - डॉ.रामाशीषपाण्डेयः, संस्कृतभारती, नवदेहली
३. स्वामिविवेकानन्दः - डॉ.ललितकुमारसाहुः, श्रीप्रिन्टर्स,पुरी
४. विवेकानन्दसूक्तिसुधा- डॉ.समुद्राल लक्ष्मणय्य, तिरुपतिः
५. वेदान्त सिद्धान्त और व्यवहार – रामकृष्ण मठ, नागपुर
६. A Wakening India – Swami Vivekananda, Ramakrishna Mission, New Delhi